# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (६)

# पुनरावर्तनम्

- समः सुटि
- अत्रानुनासिकः पूर्वस्य तु वा
- अनुनासिकात् परोऽनुस्वारः
- विसर्जनीयस्य सः
- संपुंकानां सो वक्तव्यः
- पुमः खय्यम्परे

# १४०. नश्छव्यप्रशान् (८.३.७)

- पदत्रयम् । नः, छवि, अप्रशान् ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' इत्यतः 'रु' इति, 'पुमः खय्यम्परे' इत्यतः 'अम्परे' इति च अनुवर्तते । 'पदस्य' इति अधिक्रियते ।
- नः पदस्य – षष्ठी = नकारान्तस्य पदस्य
- अम्परे छवि – सप्तमी = अम्-परके छव्-वर्णे परे
- रुः – प्रथमा = रुत्वं स्यात्
- अप्रशान् – प्रशान् शब्दस्य न भवति
- अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान् शब्दस्य ।

शार्ङ्गिन् छिन्धि

| | | | |
|---|---|---|---|
| शार्ङ्गिन् | छ् | इ | न्धि |
| नकारान्तं पदम् | छव् | अम् | |
| शार्ङ्गिर् | छ् | इ | न्धि |

- शार्ङ्गिन्  छिन्धि
- शार्ङ्गिर्  छिन्धि  ('नश्छव्यप्रशान्' – ८.३.७ – इति रुत्वम्)
- शार्ङ्गिँर्  छिन्धि ('अत्रानुनासिकः पूर्वस्य तु वा' – ८.३.२ )
- शार्ङ्गिँः  छिन्धि ('खरवसानयोः विसर्जनीयः' – ८.३.१७ – इति रेफस्य विसर्गादेशः)
- शार्ङ्गिँस्  छिन्धि ('विसर्जनीयस्य सः' – ८.३.३४ – इति सत्वम्)
- शार्ङ्गिँश्  छिन्धि ('स्तोः श्चुना श्चुः' – ८.४.४० – इति श्चुत्वम्)

१) शार्ङ्गिँश्छिन्धि

२) शार्ङ्गिंश्छिन्धि ('अनुनासिकात् परोऽनुस्वारः' – ८.३.४ – इति अनुस्वारपक्षे)

- चक्रिन् + त्रायस्व = चक्रिँस्त्रायस्व / चक्रिंस्त्रायस्व

- 'पदस्य' किम्? हन्ति ।
- हन् + त्      इ
-     छव्      अम्

- 'अम्परे' किम्? सन्त्सरुः । त्सरुः खड्गमुष्टिः ।
-     सन्      त्      स्      अरुः
- नकारान्तं पदम्      छव्      न अम्

- ’अप्रशान्’ किम्? प्रशान्तनोति ।

| | | | |
|---|---|---|---|
| प्रशान् | त् | अ | नोति |
| नकारान्तं पदम् | | छव् | अम् |

# १४१. नॄन् पे (८.३.१०)

- पदद्वयम् ।
- 'मतुवसो रु छन्दसि सम्बुद्धौ' इत्यतः 'रुँ' इति अनुवर्तते ।
- नॄन् – लुप्तषष्ठ्यन्तम् = 'नॄन्' इति शब्दस्य
- पे – सप्तमी = पकारे परे
- रु – प्रथमा = रुत्वं स्यात्
- नॄन् इत्यस्य रुः स्याद्वा पकारे परे ।

- नॄन् – ऋकारान्तः, पुँल्लिङ्गः 'नृ' शब्दः, द्वितीयाविभक्तिः, बहुवचनम् ।

- नॄन् + पाहि
- नॄर्  पाहि
- नॄँर् पाहि  (अत्रानुनासिकः...)  /   नॄंर् पाहि (अनुनासिकात्...)
- नॄँ◌ः पाहि        (खरवसानयोः...)   नॄं◌ः पाहि

# १४२. 'कुप्वो ≍क≍पौ च' (८.३.३७)

- पदत्रयम् । कुप्वोः, ≍क≍पौ, च ।
- 'विसर्जनीयस्य सः' इत्यतः 'विसर्जनीयस्य' इति अनुवर्तते ।
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- कुप्वोः – सप्तमी = कवर्गे पवर्गे च परे
- ≍क≍पौ – प्रथमा = जिह्वामूलीय-उपध्मानीयौ भवतः
- च = विसर्गः च
- कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीय-उपध्मानीयौ स्तः । चाद्विसर्गः ।

येन नाप्राप्तन्यायेन 'विसर्जनीयस्य सः' इत्यस्य अपवादोऽयम् । न तु 'खर्परे विसर्जनीयः' इत्यस्य ।

- विसर्जनीयस्य सः (८.३.३४) – खरि परे विसर्जनीयस्य सकारादेशः स्यात्
- रामः त्रायते = रामस्त्रायते ।
- शर्परे विसर्जनीयः (८.३.३५) – शर्परे खरि विसर्जनीयस्य विसर्जनीय एव स्यात् ।
- कः त्सरुः = कः त्सरुः ।
- वा शरि (८.३.३६) – शरि परे विसर्जनीयस्य विसर्जनीय एव स्याद् वा ।
- रामः शेते = रामः शेते / रामस् शेते
- कुप्वो ᳵक ᳵपौ च (८.३.३७) – कवर्गे पवर्गे च परे विसर्जनीयस्य जिह्वामूलीय-उपध्मायौ स्तः, विसर्गश्च ।
- रामः कः = रामᳵकः / रामः कः

- वासः क्षौमम् = ???
- विसर्जनीयस्य सः इत्यनेन सत्वम् ?
- शर्परे विसर्जनीयः इत्यनेन विसर्गः?
- कुप्वो ∩क∩पौ च इत्यनेन जिह्वामूलीयः?

- 'येन नाप्राप्ते यो विधिः आरभ्यते स तस्य बाधको भवति' ।
- उदा: अचि परे सर्वत्र 'आद्गुणः' इति गुणस्य अवश्यप्राप्तौ 'वृद्धिरेचि' इति वृद्धिः आरभ्यते । तस्माद् वृद्धिः गुणस्य बाधिका ।

- अत्रापि खरि परे सर्वत्र 'विसर्जनीयस्य सः' इति सत्वस्य अवश्यप्राप्तौ 'कुप्वोः..' इति जिह्वामूलीय आरभ्यते । तस्माज्जिह्वामूलीयः सत्वस्य बाधकः ।

- किन्तु कुप्वोः परयोः सर्वत्र 'शर्परे विसर्जनीयः' इत्यस्य प्राप्तिः नास्ति । 'कः त्सरुः' इत्यत्र जिह्वामूलीयस्य प्राप्तिः नास्ति, 'रामः कः' इत्यत्र विसर्जनीयस्य प्राप्तिः नास्ति । तस्मादनयोः बाध्य-बाधकभावो नास्ति । उभयोः प्राप्तौ जिह्वामूलीयस्य असिद्धत्वात् 'शर्परे विसर्जनीयः' इत्येव प्रवर्तते ।
- तेन वासः क्षौमम् इत्यादौ विसर्ग एव ।
- वासः + क्षौमम् = वासः क्षौमम् ।

- नॄन् + पाहि
- नॄर्  पाहि
- नॄँर् पाहि  (अत्रानुनासिकः...)  /    नॄंर् पाहि (अनुनासिकात्...)
- नॄँ◌ः पाहि        (खरवसानयोः...)   नॄं◌ः पाहि
- १. नॄँᳶपाहि      (कुप्वो ᳵकᳶपौ च)     २. नॄंᳶपाहि
- ३. नॄँ◌ः पाहि   (कुप्वो ᳵकᳶपौ च)        ४. नॄं◌ः पाहि
- रुत्वाभावे,
- ५. नॄन् पाहि

# १४३. कानाम्रेडिते (८.३.१२)

- पदद्वयम् । कान्, आम्रेडिते ।
- 'मतुवसो रु...' इत्यतः 'रु' इति अनुवर्तते ।
- कान् – लुप्तषष्ठ्यन्तम् = 'कान्' शब्दस्य
- आम्रेडिते – सप्तमी = आम्रेडिते परे

  'तस्य परमाम्रेडितम्' – द्विरुक्तस्य परं रूपम् आम्रेडितसंज्ञं स्यात् ।
- रुँ – प्रथमा = रुत्वं स्यात्
- 'अलोऽन्त्यस्य' इति परिभाषया अन्त्यस्य नकारस्य रुत्वम् ।
- कान्नकारस्य रुः स्यादाम्रेडिते परे ।

- कान्
- कान् कान् ('नित्यवीप्सयोः' – ८.१.४ – इति द्वित्वम्)
- कार् कान्      ('कानाम्रेडिते' – ८.३.१२ – इति रुत्वम्)
- काँर् कान्      (अत्रानुनासिकः...) / कांर् कान्
  (अनुनासिकात्...)
- काँः कान्      (खरवसानयोः...)      कांः कान्
- काँस्कान्      (संपुंकानां सो वक्तव्यः) कांस्कान्
- 'संपुंकानाम्' इति सः । यद्वा,

# १४४. कस्कादिषु च (८.३.४८)

- पदद्वयम् ।
- 'इणः षः' (८.३.३९) इति, 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, 'सोऽपदादौ' (८.३.३८) इत्यतः सः इति च अनुवर्तते ।
- कस्कादिषु – विषयसप्तमी = कस्कादिगणे पठितानां शब्दानां विषये
- इणः – पञ्चमी = इणः परस्य
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- षः – प्रथमा = षत्वं भवति ।
- इणः परत्वाभावे तु,
- सः – प्रथमा = सत्वं भवति ।
- ⌒क⌒पयोरपवादः । एषु इण उत्तरस्य विसर्गस्य षः स्यात् । अन्यस्य तु सः ।

- कस्कः (कः + कः)
- कौतस्कुतः (कौतः+कुतः)
- सर्पिष्कुण्डिका (सर्पिः+कुण्डिका)
- धनुष्कपालम् (धनुः+कपालम्)
- आकृतिगणोऽयम् ।

# १४५. संहितायाम् (६.१.७२)

- इत्यधिकृत्य ।

# १४६. छे च (६.१.७३)

- पदद्वयम् ।
- पिति कृति तुक्'(६.१.७१) इत्यतः 'ह्रस्वस्य' इति, 'तुक्' इति च अनुवर्तते ।
- ह्रस्वस्य – षष्ठी = ह्रस्वस्वरस्य
- छे – सप्तमी = सकारे परे
- तुक् – प्रथमा = तुगागमः स्यात्
- संहितायाम्
- ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम् ।

- स्व + छाया
- स्वत् छाया ('छे च' – ६.१.७३)
- स्वद् छाया ('झलां जशोऽन्ते – ८.२.३९)
- स्वज् छाया ('स्तोः श्चुना श्चुः' – ८.४.४०)
- स्वच् छाया ('खरि च' – ८.४.५५)
- स्वच्छाया
- श्चुत्वस्य असिद्धत्वात् जश्त्वेन दः । ततः चर्त्वस्य असिद्धत्वात् पूर्वं श्चुत्वेन जः । तस्य चर्त्वेन चः ।
- श्चुत्वस्य असिद्धत्वात् 'चोः कुः' (८.२.३०) इति कुत्वं न ।
- शिव+छाया = शिवच्छाया ।

# १४७. आङ्माङोश्च (६.१.७४)

- 'संहितायाम्' इति अधिक्रियते ।
- 'ह्रस्वस्य पिति कृति तुक्'(६.१.७१) इत्यतः 'तुक्' इति, 'छे च' इत्यतः 'छे' इति च अनुवर्तते ।
- आङ्माङोः – षष्ठी = आङ् इत्युपसर्गस्य, माङ् इत्यव्ययस्य च
- छे – सप्तमी = छकारे परे
- तुक् – प्रथमा = तुगागमः स्यात्
- संहितायाम्
- एतयोः छे परे तुक् स्यात् ।

- 'पदान्ताद्वा' इति विकल्पापवादः ।
- आ + छादयति = आच्छादयति ।
- मा + छिदत् = माच्छिदत् ।

# १४८. दीर्घात् (६.१.७५)

- ’संहितायाम्’ इति अधिक्रियते ।
- ’ह्रस्वस्य पिति कृति तुक्’(६.१.७१) इत्यतः ’तुक्’ इति, ’छे च’ इत्यतः ’छे’ इति च अनुवर्तते ।
- दीर्घात् छे परे तुक् स्यात् ।
- दीर्घस्यायं तुक्, न तु छस्य ।
- ’विभाषा सेनासुराच्छायाशालानिशानाम्’ इति ज्ञापकात् ।

- सुरा + छाया
- यदि छकारस्य तुगागमः स्यात्,
- सुरा छ् त् आया (पदान्ताद्वा – ६.१.७६)
- सुरा छ् च् आया (स्तोः श्चुना श्चुः – ८.४.४०)
- सुरा च् च् आया (खरि च – ८.४.५५)
- 'सुराच्चाया' इति स्यात्, छकारस्य श्रवणं न स्यात् ।

- दीर्घस्य तुगागमे तु,
- सुरात् छाया
- सुराद् छाया ('झलां जशोऽन्ते' – ८.२.३९)
- सुराज् छाया ('स्तोः श्चुना श्चुः' – ८.४.४०)
- सुराच् छाया ('खरि च' – ८.४.५५)
- सुराच्छाया

- चे + छिद्यते = चेच्छिद्यते ।

# १४९. पदान्ताद्वा (६.१.७६)

- ’संहितायाम्’ इति अधिक्रियते ।
- ’ह्रस्वस्य पिति कृति तुक्’(६.१.७१) इत्यतः ’तुक्’ इति, ’छे च’ इत्यतः ’छे’ इति, ’दीर्घात्’ इत्यतः ’दीर्घात्’ इति च अनुवर्तते ।
- दीर्घात् पदान्तात् छे परे तुग् वा स्यात् ।
- लक्ष्मी + छाया = लक्ष्मीच्छाया / लक्ष्मीछाया ।